# || নাৰাযণোপনিষত্ অথৱা নাৰাযণ অথৰ্ৱশীৰ্ষ ||

কৃষ্ণযজুৰ্ৱেদীযা
ওং সহ নাৱৱতু সহ নৌ ভুনক্তু | সহ ৱীৰ্যং কৰৱাৱহৈ |
তেজস্বিনাৱধীতমস্তু | মা ৱিদ্বিষাৱহৈ ||
ওং শাংতিঃ শাংতিঃ শাংতিঃ ||
(প্ৰথমঃ খংডঃ
নাৰাযণাত্ সৰ্ৱচেতনাচেতনজন্ম)

ওং অথ পুৰুষো হ ৱৈ নাৰাযণোঽকামযত প্ৰজাঃ সৃজেযেতি |
নাৰাযণাত্প্ৰাণো জাযতে | মনঃ সৰ্ৱেংদ্ৰিযাণি চ |
খং ৱাযুৰ্জ্যোতিৰাপঃ পৃথিৱী ৱিশ্বস্য ধাৰিণী |
নাৰাযণাদ্ ব্ৰহ্মা জাযতে | নাৰাযণাদ্ ৰুদ্ৰো জাযতে |
নাৰাযণাদিংদ্ৰো জাযতে | নাৰাযণাত্প্ৰজাপতযঃ প্ৰজাযংতে |
নাৰাযণাদ্দ্বাদশাদিত্যা ৰুদ্ৰা ৱসৱঃ সৰ্ৱাণি চ ছংদাꣳসি |
নাৰাযণাদেৱ সমুত্পদ্যংতে | নাৰাযণে প্ৰৱৰ্তংতে | নাৰাযণে প্ৰলীযংতে ||
(এতদৃগ্বেদশিৰোঽধীতে |)

(দ্বিতীযঃ খংডঃ
নাৰাযণস্য সৰ্ৱাত্মত্বং)

ওং | অথ নিত্যো নাৰাযণঃ | ব্ৰহ্মা নাৰাযণঃ | শিৱশ্চ নাৰাযণঃ |
শক্ৰশ্চ নাৰাযণঃ | দ্যাৱাপৃথিৱ্যৌ চ নাৰাযণঃ |
কালশ্চ নাৰাযণঃ | দিশশ্চ নাৰাযণঃ | ঊৰ্ধ্বংশ্চ নাৰাযণঃ |
অধশ্চ নাৰাযণঃ | অংতৰ্বহিশ্চ নাৰাযণঃ | নাৰাযণ এৱেদꣳ সৰ্ৱং |
যদ্ভূতং যচ্চ ভৱ্যং | নিষ্কলো নিৰংজনো নিৰ্ৱিকল্পো নিৰাখ্যাতঃ
শুদ্ধো দেৱ একো নাৰাযণঃ | ন দ্বিতীযোঽস্তি কশ্চিত্ | য এৱং ৱেদ |
স ৱিষ্ণুৰেৱ ভৱতি স ৱিষ্ণুৰেৱ ভৱতি ||
(এতদ্যজুৰ্ৱেদশিৰোঽধীতে |)

(তৃতীযঃ খংডঃ
নাৰাযণাষ্টাক্ষৰমংত্ৰঃ)

ওমিত্যগ্ৰে ৱ্যাহৰেত্ | নম ইতি পশ্চাত্ | নাৰাযণাযেত্যুপৰিষ্টাত্ |
ওমিত্যেকাক্ষৰং | নম ইতি দ্বে অক্ষৰে | নাৰাযণাযেতি পংচাক্ষৰাণি |
এতদ্বৈ নাৰাযণস্যাষ্টাক্ষৰং পদং |
যো হ ৱৈ নাৰাযণস্যাষ্টাক্ষৰং পদমধ্যেতি | অনপব্ৰুৱস্সৰ্ৱমাযুৰেতি |
ৱিংদতে প্ৰাজাপত্যꣳ ৰাযস্পোষং গৌপত্যং |
ততোঽমৃতত্বমশ্নুতে ততোঽমৃতত্বমশ্নুত ইতি | য এৱং ৱেদ ||
(এতত্সামৱেদশিৰোঽধীতে | ওং নমো নাৰাযণায)

(চতুৰ্থঃ খংডঃ
নাৰাযণপ্ৰণৱঃ)

প্ৰত্যগানংদং ব্ৰহ্মপুৰুষং প্ৰণৱস্বৰূপং | অকাৰ উকাৰ মকাৰ ইতি |
তানেকধা সমভৱত্তদেতদোমিতি |
যমুক্ত্ৱা মুচ্যতে যোগী জন্মসংসাৰবংধনাত্ |

## || নাৰাযণোপনিষত্ অথৱা নাৰাযণ অথৰ্ৱশীৰ্ষ ||

ওং নমো নাৰাযণাযেতি মংত্ৰোপাসকঃ | ৱৈকুংঠভুৱনলোকং গমিষ্যতি |
তদিদং পৰং পুংডৰীকং ৱিজ্ঞানঘনং | তস্মাত্তটিদাভমাত্ৰং |

ব্ৰহ্মণ্যো দেৱকীপুত্ৰো ব্ৰহ্মণ্যো মধুসূদনোং | ব্ৰহ্মণ্যো মধুসূদনযোং
সৰ্ৱভূতস্থমেকং নাৰাযণং | কাৰণৰূপমকাৰ পৰং ব্ৰহ্মোং |
এতদথৰ্ৱশিৰোযোধীতে ||
ৱিদ্যাঽধ্যযনফলং |
প্ৰাতৰধীযানো ৰাত্ৰিকৃতং পাপং নাশযতি |
সাযমধীযানো দিৱসকৃতং পাপং নাশযতি |
মাধ্যংদিনমাদিত্যাভিমুখোঽধীযানঃ পংচমহাপাতকোপপাতকাত্ প্ৰমুচ্যতে |
সৰ্ৱ ৱেদ পাৰাযণ পুণ্যং লভতে |
নাৰাযণসাযুজ্যমৱাপ্নোতি নাৰাযণ সাযুজ্যমৱাপ্নোতি |
য এৱং ৱেদ | ইত্যুপনিষত্ ||
ওং সহ নাৱৱতু সহ নৌ ভুনক্তু | সহ ৱীৰ্যং কৰৱাৱহৈ |
তেজস্বিনাৱধীতমস্তু | মা ৱিদ্বিষাৱহৈ ||
ওং শাংতিঃ শাংতিঃ শাংতিঃ ||
শাংতাকাৰং ভুজগশযনং পদ্মনাভং সুৰেশং
ৱিশ্বাধাৰং গগনসদৃশং মেঘৱৰ্ণং শুভাংগং |
লক্ষ্মীকাংতং কমলনযনং যোগিভিৰ্ধ্যানগম্যং
ৱংদে ৱিষ্ণুং ভৱভযহৰং সৰ্ৱলোকৈকনাথং ||